तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात्, मानसप्रत्यक्षता च तदन्तरेणापि। ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेरिति यथा क्षित्यादिषु द्रव्येषु शब्दस्य व्यतिरेकोऽव्यभिचारी नियतस्तेन तदाश्रयस्याष्टद्रव्यातिरिक्तस्याकाशरूपस्य विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अष्टद्रव्यातिरिक्तेन भवितव्यम्। नन्वेतावताऽप्यानुमानिक एव आत्मा न तु प्रत्यक्ष इत्यत आह अहमिति मुख्ययोग्याभ्यामिति अहमितीतिकारेण ज्ञानाकारमाह तेनाहमिति ज्ञानं शब्दलिङ्गानुसन्धानमन्तरेण निमीलिताक्षस्य यदुत्पद्यते तन्मुख्येन अहन्त्ववता योग्येन प्रमाणसिद्धेन उपपादनीयम्, न तु शरीरादिना, तत्रेच्छाया व्यतिरेकस्य व्यभिचारात् अभावात्। मुख्ययोग्याभ्यामित्यनन्तरम् उपपादनीयमिति पूरणीयम् आत्मनि प्रमाणानि बहूनि सन्ति ग्रन्थगौरवभिया नोक्तानि मयूखेऽन्वेष्टव्यानि १८। आत्मपरीक्षाप्रकरणं समाप्य इदानीमात्मनानात्वप्रकरणमारभते तत्र पूर्व्वपक्षसूत्रम्। एक एव आत्मा चैत्रमैत्रादिदेहभेदेऽपि, कुतः सुखदुःखज्ञानानां निष्पत्तेरुत्पत्तेरविशेषात् सर्व्वशरीरावच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरविशिष्टैव यतः यद्यात्मभेदसाधकं लिङ्गान्तरं भवेत्तदा सिद्ध्येदात्मभेदः, न च तदस्ति, यथा तत्तत्प्रदेशावच्छेदेन शब्दनिष्पत्तावपि शब्दलिङ्गाविशेषादेकमेवाकाशम् यौगपद्यादिप्रत्ययलिङ्गाविशेषादेक एव कालः पूर्व्वापरादिप्रत्ययलिङ्गाविशेषादेकैव दिक् १९। सिद्धान्तमाह। नाना आत्मानः कुतः? व्यवस्थातः व्यवस्था प्रतिनियमः। यथा कश्चिदाढ्यः, कश्चित् रङ्कः, कश्चित् सुखी, कश्चिद्दुःखी, कश्चिदुच्चाभिजनः, कश्चिन्नीचाभिजनः, कश्चिद्विद्वान्, कश्चित् जाल्म इतीयं व्यवस्था आत्मभेदमन्तरेणानुपपद्यमाना साधयत्यात्मनां भेदम्, न च जन्मभेदेन बाल्यकौमारवार्द्धक्यभेदेन वा, एकस्याप्यात्मनो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभेदेऽपि स्यादिति वाच्यं कालभेदेन विरुद्धधर्म्माध्याससम्भवात्" २०। उपस्कारः सांख्यसूत्रभाष्ययोश्च प्रत्येकं भूतेषु चैतन्यादर्शनेन समुदाये न चैतन्यमित्युक्तं यथा "न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः"१। "प्रपञ्चमरणाद्यभावश्च"२। "मदशक्तिवच्चेत् प्रत्येकपरिदृष्टे सांहत्ये तदुद्भवः३" सां० सू० "देहस्य भौतिकत्वेन यत् सिध्यति तदाह। भूतेषु पृथक्कृतेषु चैतन्यादर्शनाद्भौतिकस्य देहस्य न स्वाभाविकं चैतन्यं किन्त्वौपाधिकमित्यर्थः १। बाधकान्तरमाह। प्रपञ्चस्य सर्वस्यैव मरणसुषुप्त्याद्यभावश्च देहस्य स्वाभाविकचैतन्ये सति स्यादित्यर्थः। मरणसुषुप्त्यादिकं हि देहस्याचेतनता सा च स्वाभाविकचैतन्ये सति नोपपद्यते स्वभावस्य यावद्द्रव्यभावित्वादिति २। प्रत्येकादृष्टेरिति यदुक्तं तत्राशङ्क्य परिहरति। ननु यथा मादकता शक्तिः प्रत्येकद्रव्यावृत्तिरपि मिलितद्रव्ये वर्त्तते एवं चैतन्यमपि स्यादिति चेन्न प्रत्येकपरिदृष्टे सति सांहत्ये तदुद्भवः सम्भवेत्। प्रकृते तु प्रत्येकपरिदृष्टत्वं नास्ति। अतो दृष्टान्ते प्रत्येकं शाल्यादिभिः सूक्ष्मतया मादकत्वे सिद्धे संहतभावकाले मादकत्वाविर्भावमात्रं सिद्ध्यति। दार्ष्टान्तिके तु प्रत्येकभूतेषु सूक्ष्मतया न केनापि प्रमाणेन चैतन्यं सिद्धमित्यर्थः ननु समुच्चिते चैतन्यदर्शनेन प्रत्येकभूते सूक्ष्मचैतन्यशक्तिरनुमेयेति चेन्न अनेकभूतेष्वनेकचैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव नित्यचित्स्वरूपस्य कल्पनौचित्यात्। ननु यथावयवेऽवर्त्तमानमपि परिमाणजलाहरणादि कार्यं घटादौ दृश्यते एवमेव शरीरे चैतन्यं स्यादिति चेत् मैवम् भूतगतविशेषगुणानां सजातीयकारणगुणजन्यतया कारणे चैतन्यं विना देहे चैतन्यासम्भवादिति"भा० अयमात्मा सांख्यैः पुरुषशब्देनाभिधीयते ते च नाना "जन्मादिव्यवस्थातः पुरुषबहुत्वम्"सां० सूत्रात्। वेदान्तिनस्तु तस्यैकत्वेऽपि उपाधिभेदेन कर्णशष्कुल्यादिभेदेनाकाशभेदवत् नानात्वं वस्तुत एकत्वम् "इन्द्रोमायाभिः पुरुरूप ईयते" "रूपंरूपं प्रतिरूपो बभूवेति" श्रुतेः अंशो-ननाव्यपदेशात्" "तद्गुणसारत्वादिति" च न्यायाच्चेति। एतत्प्रपञ्चस्तु शा० भा० द्रष्टव्यः।

मिताक्षरायाम् देहाद्यतिरिक्तात्मास्तित्वे प्रमाणं दर्शितं यथा "भूतचैतन्यवादिपक्षम्परिजिहीर्षुराह"। "वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च। आर्त्त्या गत्या तथाऽऽगत्या सत्येन ह्यनृतेन च। श्रेयसा सुखदुःखाभ्याङ्कर्मभिश्च शुभाशुभैः। निमित्तशकुनज्ञानग्रहसंयोगजैः फलैः। तारानक्षत्रसञ्चारैर्जागरैः स्वप्नजैरपि। आकाशपवनज्योतिर्जलभूतिमिरैस्तथा। मन्वन्तरयुगप्राप्त्या मन्त्रौषधिफलैरपि। वित्तात्मानं विद्यमानम् कारणञ्जगतस्तथा"या० वेदैः "सएष नेति नेतीत्यात्मेति" "अस्थूलमनण्वह्रस्वमपाणिपादम्" इत्यादिभिः। शास्त्रैश्च मीमांसान्वीक्षिक्यादिभिः विज्ञानैश्च ममेदं शरीरमित्यादि देहव्यतिरिक्तात्मानुभवैः। तथा जन्ममरणाभ्यां जन्मान्तरानुष्ठितधर्म्म